११

246sk11

अजन्तपुंलिङ्गे अदन्तशब्दानां सर्वनाम्नां च रूपाणि

प्रस्तावना

पूर्वस्मिन् पाठे भवन्तः प्रातिपदिकसंज्ञा केषां भवति इति ज्ञातवन्तः। एकविंशतेः विभक्तीनां परिचयम् अपि भवन्तः प्राप्तवन्तः। ततः एकत्व-द्वित्व-बहुत्वसंख्यानां क्रमात् एकवचन-द्विवचवन-बहुवचनसंज्ञा भवन्ति इति ज्ञातवन्तः। प्रातिपदिकात् सुबुत्पत्तिः कथं भवति इत्यपि ज्ञातवन्तः। नकारस्य स्थाने णकारः कदा भवति इति विषये अपि सम्यक् ज्ञानं लब्धवन्तः। ततः रामशब्दस्य द्वितीयाविभक्तिं यावत् रूपसाधनप्रक्रियां ज्ञातवन्तः। ततः अस्मिन् प्रकरणे रामशब्दस्य तृतीयादिषु विभक्तिषु रूपाणि कथं भवन्ति इति विषये आलोचयामः। अपि च सर्वादिगणे सर्वनामसंज्ञकाः सर्वादिशब्दाः पठिताः। सर्वासु भाषासु एव सर्वनामशब्दानां व्यवहारः भवति। तेन भाषायाः माहात्म्यम् अपि वर्धते। संस्कृतवाङ्मये अपि नैके सर्वनामशब्दाः सन्ति। एते शब्दाः अपि अजन्तहलन्तरूपेण द्विविधाः। अजन्तशब्दाः हलन्तशब्दाः च पुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गभेदेन त्रिविधाः भवन्ति। अस्मिन् पाठे अजन्तपुंलिङ्गसर्वनामशब्दानां विषये चर्चा प्रस्तुता। किञ्च तेषां रूपसाधनप्रक्रिया अपि आलोचिता।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- रामशब्दस्य तृतीयादिविभक्तिषु रूपसाधनानि कथं भवति इति ज्ञातुं शक्नुयात्।
- स्थानिवद्भावः कुत्र भवति इति बोद्धुं शक्तः भविष्यति।
- स्थानिवद्भावस्य कुत्र निषेधो भवति इति अपि ज्ञातुं पारयेत्।
- सकारस्य षकारादेशः कुत्र भवति इति बोद्धुं शक्तः भविष्यति।
- सर्वनामसंज्ञा केषां शब्दानां भवति इति ज्ञातुं पारयेत्।
- सर्वादिगणे के शब्दाः पठिताः इति ज्ञातुं शक्नुयात्।
- सर्वनामशब्दानां रूपसाधनप्रक्रियां सम्यक् ज्ञातुं शक्नुयात्।

[११.१] टाङसिङसामिनात्स्याः॥ (७.१.१२)

सूत्रार्थः - अकारान्तात् अङ्गात् परेषां टादीनां क्रमात् इनादयः आदेशाः भवन्ति।

सूत्रव्याखा- इदं विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। टाङसिङसाम् इनात्स्याः इति सूत्रगतपदच्छेदः। टाङसिङसाम् (६/३), इनात्स्याः (१/३)। अतो भिस ऐस् इत्यस्मात् सूत्रात् अतः (५/१) इति पदम् अनुवर्तते। अङ्गस्य इति सूत्रम् अधिक्रियते। तस्य अङ्गात् इति पञ्चम्यन्ततया विभक्तिविपरिणामः भवति। टाङसिङसाम् इति षष्ठीबहुवचनान्तं पदम्। टा च ङसिः च ङस् च इति टाङसिङसः तेषां, टाङसिङसाम् इति इतरेतरयोगद्वन्द्वसमासः। इनात्स्याः इति प्रथमाबहुवचनान्तं पदम्। इनश्च आच्च स्यश्च इति इनात्स्याः इतरेतरयोगद्वन्द्वसमासः। अतः अङ्गात् टाङसिङसाम् इनात्स्याः इति पदयोजना। अतः इति अङ्गात् इत्यस्य विशेषणम्। तेन तदन्तविधिना अदन्तात् अङ्गात् इत्यर्थः आगच्छति। अत्र स्थानिनः त्रयः, आदेशाः अपि त्रयः। तेन यथासंख्यविधिः भवति। अतः सूत्रस्यास्य अर्थो भवति - अदन्तात् अङ्गात् परेषां टाङसिङसाम् क्रमात् इनात्स्याः भवन्ति इति। अर्थात् अकारान्तात् अङ्गात् परस्य टाप्रत्ययस्य स्थाने इन-आदेशः, ङसिप्रत्ययस्य स्थाने आत्-आदेशः, ङस्प्रत्ययस्य स्थाने स्य-आदेशश्च भवति।

उदाहरणम् - रामेण।

सूत्रार्थसमन्वयः - रामशब्दात् तृतीयैकवचनविवक्षायां टाप्रत्यये चुटू इति सूत्रेण प्रत्ययाद्यस्य टकारस्य इत्संज्ञायां तस्य लोपः इति टलोपे राम आ इति स्थितिः भवति। रामशब्दः अदन्तः अस्ति। टाप्रत्ययः परमस्ति। अतः यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इत्यनेन रामशब्दस्य अङ्गसंज्ञा भवति। तस्मात् अदन्ताद् अङ्गात् परस्य टाप्रत्ययस्य टाङसिङसामिनात्स्याः इत्यनेन अनेकाल्त्वात् इन इति सर्वादेशे राम इन इति स्थितिः। ततः आद्गुणः इत्यनेन गुणे एकादेशे रामेन इति स्थितिः जायते। ततः अट्कुप्वाङ्नुम्व्यवायेऽपि इत्यनेन नकारस्य णकारादेशे रामेण इति रूपं सिद्धं भवति।

[११.२] सुपि च॥ (७.३.१०२)

सूत्रार्थः - यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयम् अस्ति। सुपि (७/१), च इत्यव्ययम्। अतो दीर्घो यञि इति सम्पूर्णं सूत्रम् अनुवर्तते। अङ्गस्य इति षष्ठ्यन्तं पदमधिक्रियते। अतः इति षष्ठ्यन्तं पदम्। दीर्घः इति प्रथमैकवचनान्तं पदम्। यञि इति सप्तम्येकवचनान्तं पदम्। अतः अङ्गस्य दीर्घः यञि सुपि इति पदयोजना। यञि इति सुपि इत्यस्य विशेषणम्। यञ् इति प्रत्यहारः। तेन तदादिविधिना यञादौ सुपि इति लभ्यते। अतः इति अङ्गविशेषणम्। तेन तदन्तविधिना अदन्तस्य अङ्गस्य इत्यर्थो लभ्यते। अदन्ताङ्गस्य इति स्थानषष्ठी। अतः अलोऽन्त्यस्य इति परिभाषया अदन्ताङ्गस्य अन्त्यस्य अलः स्थाने आदेशो भवति। तेन अस्य सूत्रस्य अर्थः भवति - यञादौ सुपि परे अदन्तस्य अङ्गस्य अन्त्यस्य अलः दीर्घः स्याद् इति। अर्थात् यञादिसुप्प्रत्ययः यदि परे स्यात् तर्हि अदन्तस्य अङ्गस्य अन्त्यस्य अतः दीर्घः भवति।

उदाहरणम् - रामाभ्याम्।

सूत्रार्थसमन्वयः - प्रातिपदिकसंज्ञकात् रामशब्दात् तृतीयाद्विवचनविवक्षायां भ्याम्प्रत्यये राम भ्याम् इति स्थितिः जायते। भ्याम् इत्यत्र मकारस्य हलन्त्यम् इत्यनेन इत्संज्ञा प्राप्नोति। तस्याः न विभक्तौ तुस्माः इत्यनेन निषेधः भवति। रामशब्दः अदन्तः अस्ति। तस्य च भ्याम् इति प्रत्यये परे यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेङ्गम् इत्यनेन अङ्गसंज्ञा भवति। भ्याम् यञादिः सुप्। तस्मात् यञादौ सुपि भ्यामि परे सुपि च इत्यनेन सूत्रेण अदन्तस्य अङ्गस्य अन्त्यस्य अतः दीर्घः भवति। तेन अकारस्य आकारे रामा भ्याम् इति स्थितिः भवति। ततः वर्णसम्मेलने रामाभ्याम् इति रूपं निष्पद्यते।

[११.३]   अतो भिस ऐस्॥ (७.१.९)

सूत्रार्थः - अकारान्ताद् अङ्गात् भिस ऐस् इत्यादेशः भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। अतः भिसः ऐस् इति सूत्रगतपदच्छेदः। अतः इति पञ्चम्येकवचनान्तं पदम्। भिसः इति षष्ठ्येकवचनान्तं पदम्। ऐस् इति प्रथमैकवचनान्तं पदम्। अङ्गस्य इत्यधिक्रियते। अङ्गस्य इति पदस्य पञ्चम्यन्ततया विपरिणामः भवति। अतः अङ्गस्य भिसः ऐस् इति पदयोजना। अतः इति अङ्गविशेषणम्। तस्मात् तदन्तविधिना अदन्तस्य अङ्गस्य इत्यर्थो लभ्यते। भिस् इति अल्समुदायबोधकं पदम् अस्ति। अर्थात् भिस् इति पदं केवलम् एकः वर्णः इति न अपि तु वर्णसमुदायः। किञ्च भिस् इत्यतः षष्ठीविभक्तिः श्रूयते। ऐसादेशः तु अनेकाल् अस्ति। अतः अनेकाल्शित् सर्वस्य इति परिभाषया भिसः सम्पूर्णस्य स्थाने भवति। तेन अस्य सूत्रस्य अर्थो- अकारान्ताद् अङ्गात् परस्य सम्पूर्णस्य भिसः स्थाने ऐसादेशः भवति इति।

उदाहरणम्- रामैः।

सूत्रार्थसमन्वयः- रामशब्दात् तृतीयाबहुवचनविवक्षायां भिस्प्रत्यये राम भिस् इति स्थितिः भवति। भिस् इति सुप्प्रत्ययः। अतः विभक्तिसंज्ञकः। तेन भिसः सकारस्य हलन्त्यम् इति सूत्रेण प्राप्तायाः इत्संज्ञायाः न विभक्तौ तुस्माः इत्यनेन निषेधः भवति। रामशब्दः अदन्तः अस्ति। किञ्च रामशब्दस्य अङ्गसंज्ञा भवति। ततः परं भिस्प्रत्ययः अस्ति। तस्मात् अनेन सूत्रेण अदन्ताद् अङ्गात् परस्य सम्पूर्णस्य भिसः ऐसादेशे राम ऐस् इति स्थितिः भवति। अधुना रामशब्दस्य अकारात् परम् एचः ऐकारः वर्तते। अतः वृद्धिरेचि इत्यनेन अकारैकारयोः वृद्धौ ऐकारैकादेशे रामैस् इति स्थितिः भवति। तदा सुबन्तस्य रामस् इत्यस्य पदसंज्ञायां सस्य रुत्वे विसर्गे च रामैः इति रूपं सिद्ध्यति।

[११.४]   ङेर्यः॥ (७.१.१९)

सूत्रार्थः - अतः अङ्गात्परस्य ङे इत्यस्य स्थाने यादेशः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयं विद्यते। ङेः यः इति सूत्रगतपदच्छेदः। ङेः इति षष्ठ्येकवचनान्तं पदम्। यः इति प्रथमैकवचनान्तं पदम्। अतो भिस ऐस् इत्यस्मात् सूत्रात् अतः इति पञ्चम्यन्तं पदम् अनुवर्तते। अङ्गस्य इत्यधिक्रियते। अङ्गस्य इति सूत्रस्य पञ्चम्यन्ततया विपरिणामः भवति। अतः अङ्गस्य ङेः यः इति पदयोजना। अतः इति अङ्गविशेषणम्। तेन तदन्तविधिना अदन्ताद्

अङ्गाद् इत्यर्थो लभ्यते। तेन अस्य सूत्रस्य अर्थः भवति- अदन्तात् अङ्गात्परस्य ङे इत्यस्य यादेशः भवति इति। अर्थात् अकारान्तं यदङ्गं तस्मात् परस्य ङेप्रत्ययस्य यादेशः भवति। यादेशः अनेकाल् अस्ति। तस्मात् सर्वस्य ङे इत्यस्य स्थाने भवति।

उदाहरणम्- रामशब्दस्य चतुर्थ्येकवचनविवक्षायां ङेप्रत्यये राम ङे इति स्थितिः जायते। रामशब्दः अदन्तः अस्ति। तस्माद् अनेन सूत्रेण अदन्ताद् अङ्गात् परस्य ङेप्रत्ययस्य यादेशे राम य इति स्थितिः भवति। यद्यपि यादेशः यञादिः अस्ति। तथापि सुपि च इत्यनेन अङ्गसंज्ञकस्य रामशब्दस्य अकारस्य दीर्घः न भवति । यतो हि यादेशः न सुप्। ततः अग्रिमं सूत्रम् आरभ्यते-

पाठगतप्रश्नाः-१

१. रामेण इत्यत्र टा इत्यस्य इनादेशः केन भवति।
२. रामेण इत्यत्र नकारस्य णकारः केन सूत्रेण।
३. टाङसिङसामिनात्स्याः इति सूत्रार्थं लिखत।
४. रामाभ्याम् इत्यत्र दीर्घः केन भवति।
५. सुपि च इत्यस्य अर्थं लिखत।
६. भिसः स्थाने केन सूत्रेण ऐसादेशः विधीयते।
७. ङे इत्यस्य कः आदेशः भवति।

[११.५] स्थानिवदादेशोऽनल्विधौ॥ (१.१.५५)

सूत्रार्थः - आदेशः स्थानिवत् भवति, न तु स्थान्यलाश्रयविधौ।

सूत्रव्याख्या- इदम् अतिदेशसूत्रम्। स्थानिवत् आदेशः अनल्विधौ इति सूत्रगतपदच्छेदः। पदत्रयात्मकेऽस्मिन् सूत्रे स्थानिवदिति अव्ययं पदम्। स्थानं नाम प्रसङ्गः। यस्य स्थाने अन्यद् विधीयते तत्स्थानी। स्थानिना तुल्यम् इति स्थानिवत्। आदेशः इति प्रथमैकवचनान्तं पदम्। यस्य विधानेन अन्यः निवर्तते स आदेशः। आदेशः स्थानिवदित्यस्य आदेशः स्थानिना तुल्यो भवति इत्यर्थः। अनल्विधौ इति सप्तम्यन्तं समस्तं पदम्। विधिर्नाम कार्यम्। अल्विधिरित्यत्र अला विधिः, अलः परस्य विधिः, अलः विधिः अलि विधिः चेति विग्रहे यथाक्रमं तृतीया-पञ्चमी-षष्ठी-सप्तमीतत्पुरुषसमासः। न अल्विधिः अनल्विधिः, तस्मिन् अनल्विधौ इति। अलाश्रयभिन्ने कार्ये कर्तव्ये इति तस्य अर्थः। तेन अलाश्रयकार्ये कर्तव्ये स्थानिवन्न भवतीति फलितम्। अल् इति वर्णपर्यायः। अत्र अल् इत्यनेन स्थानिभूतः स्थान्यवयवश्च गृह्यते। ततश्च अस्य सूत्रस्य अर्थो भवति- स्थानिभूतो योऽल् स्थान्यवयवश्च योऽल् तमाश्रित्य कार्ये कर्तव्ये आदेशः न स्थानिवत् इति। तेन आदेशः स्थानिवत् स्यान्न तु स्थान्यलाश्रयविधौ इति उच्यते।

उदाहरणम्- रामाय।

सूत्रार्थसमन्वयः- रामशब्दात् चतुर्थ्येकवचने ङेप्रत्यये ङेर्यः इति ङेप्रत्ययस्य यादेशे राम य इति जातम्। अत्र ङे इति स्थानी। तमाश्रित्य अत्र किमपि कार्यं न भवति। अतः अत्र स्थान्यलाश्रयविधिः वर्तते। अत्र च स्थानिनः धर्मः सुप्त्वम्। अतः प्रकृतसूत्रेण आदेशभूते यकारे सुप्त्वधर्मः अतिदिश्यते। तेन यकारे स्वकीयं यञादिधर्मः, अतिदिश्यमानः सुप्त्वधर्मश्च वर्तते। तेन सुपि च इति दीर्घः सिद्धः। तेन रामा य इति स्थिते वर्णसम्मेलने रामाय इति रूपं सिद्ध्यति।

रामशब्दस्य चतुर्थीद्विवचने भ्यामि प्रत्यये राम भ्याम् इति स्थितिः। तत्र पूर्ववत् मकारस्य न विभक्तौ तुस्माः इत्यनेन इत्संज्ञायाः निषेधः भवति। ततः सुपि च इत्यनेन यञादौ सुपि परे अदन्तस्य अङ्गस्य दीर्घे आकारे रामा भ्याम् इति स्थितिः। ततः वर्णसम्मेलने रामाभ्याम् इति रूपं सिद्ध्यति।

रामशब्दात् चतुर्थीबहुवचने भ्यस्प्रत्यये राम भ्यस् इति स्थिते-

[११.६] बहुवचने झल्येत्॥ (७.३.१०३)

सूत्रार्थः - झलादौ बहुवचने सुपि परे अतोऽङ्गस्यैकारः भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे पदत्रयं विद्यते। बहुवचने झलि एत् इति सूत्रगतपदच्छेदः। बहुवचने इति सप्तम्येकवचनान्तं पदम्। झलि इत्यपि सप्तम्येकवचनान्तं पदम्। झल्प्रत्याहारे परे इत्यर्थः। एत् इति प्रथमैकवचनान्तं पदम्। एदित्यनेन ह्रस्वैकारस्य एव ग्रहणम्। अतो दीर्घो यञि इत्यस्मात् सूत्रात् अतः इति षष्ठ्यन्तं पदम् अनुवर्तते। सुपि च इत्यस्मात् सूत्रात् सुपि इति सप्तम्यन्तं पदम् अनुवर्तते। अङ्गस्य इत्यधिक्रियते। अतः यञि सुपि अङ्गस्य बहुवचने झलि एत् इति पदयोजना। अतः इति अङ्गविशेषणम्। तेन तदन्तविधिना अदन्तस्य अङ्गस्य इत्यर्थो लभ्यते। अङ्गस्य इत्यत्र स्थानेषष्ठी अस्ति। अतः अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य अलः इत्यर्थलाभः। झलीत्यनेन सुपीति विशिष्यते। तेन तदादिविधिना झलादौ सुपि इत्यर्थो लभ्यते। तेन अस्य सूत्रस्य झलादौ बहुवचने सुपि परे अदन्तस्य अङ्गस्य अन्त्यस्य अलः एकारः स्याद् इत्यर्थो लभ्यते। अर्थात् बहुवचने विद्यमानः यः सुप्रत्ययः स यदि झलादिः स्यात् तर्हि तस्मिन् परे अदन्तस्य अङ्गस्य अन्त्यस्य अलः अतः एकारादेशः स्यात्।

उदाहरणम्- रामेभ्यः।

सूत्रार्थसमन्वयः- रामशब्दात् चतुर्थीबहुवचने भ्यस्प्रत्यये राम भ्यस् इति स्थितिः। सकारस्य अलोऽन्त्यम् इत्यनेन इत्संज्ञा प्राप्ता। तस्य न विभक्तौ तुस्माः इत्यनेन सूत्रेण निषेधो भवति। ततः बहुवचने झल्येत् इत्यनेन सूत्रेण झलादौ बहुवचने सुपि परे अदन्तस्य अङ्गस्य अन्त्यस्य अलः अतः एकारे रामेभ्यस् इति भवति। तत्र सकारस्य रुत्वे विसर्गे रामेभ्यः इति रूपं सिद्ध्यति।

प्रातिपदिकसंज्ञकात् रामशब्दात् पञ्चम्येकवचनविवक्षायां ङसि प्रत्यये राम ङसि इति स्थितिः जायते। ततः टाङसिङसामिनात्स्याः इत्यनेन ङसेः स्थाने आत्-इत्यादेशे राम आत् इति स्थितिः भवति। अत्र अकः सवर्णे दीर्घः इति सूत्रेण पूर्वपरयोः अकाराकारयोः स्थाने आकाररूपसवर्णदीर्घैकादेशे रामात् इति भवति। तस्य सुबन्तत्वेन सुप्तिङन्तं पदम् इत्यनेन सूत्रेण पदसंज्ञा भवति। तत्र पदान्ते

विद्यमानस्य झलः तकारस्य झलां जशोऽन्ते इति दकारे रामाद् इति भवति। परन्तु अस्माकं रामात् इति रूपम् अपि इष्टम् अस्ति। अतः नूतनं सूत्रमारभ्यते-

[११.७] वाऽवसाने॥ (८.४.५६)

सूत्रार्थः - अवसाने झलां चरो वा स्युः।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। वा अवसाने इति सूत्रगतपदच्छेदः। अवसाने इति सप्तम्येकवचनान्तं पदम्। वा इति अव्ययपदम्। झलां जश् झशि इत्यस्मात् सूत्रात् झलाम् षष्ठ्यन्तं पदम् अनुवर्तते। अभ्यासे चर्च इत्यस्मात् सूत्रात् चर् इति प्रथमान्तं पदम् अनुवर्तते। अवसाने झलां चर् वा इति पदयोजना। चर् इत्यस्य बहुवचनान्ततया विपरिणामः भवति। झल् चर् इति उभौ अपि प्रत्याहारौ। तेन अस्य सूत्रस्य अर्थो भवति- अवसाने झलां चरो वा भवन्ति इति। अर्थात् अवसाने परे झल्प्रत्याहारस्थवर्णानां चरः विकल्पेन भवन्ति।

उदाहरणम्- रामात्।

सूत्रार्थसमन्वयः- रामशब्दात् पञ्चम्येकवचने ङसिप्रत्यये प्रक्रियाकार्ये रामाद् इति जातम्। दकारात् परं वर्णोच्चारणस्य अभावः अस्ति। तदभावस्य विरामोऽवसानम् इत्यनेन अवसानसंज्ञा भवति। दकारः झल्प्रत्याहारे विद्यते। तेन वाऽवसाने इत्यनेन झलः दकारस्य वैकल्पिके चर्त्वे तकारे रामात् इति रूपं सिध्यति। वाऽवसाने इत्यस्य वैकल्पिकत्वेन तत्प्रवृत्त्यभावपक्षे रामाद् इत्यपि रूपं भवति।

रामशब्दस्य षष्ठ्येकवचनविवक्षायां ङस्-प्रत्यये राम ङस् इति स्थितिः। तत्र यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इति प्रकृतेः रामशब्दस्य अङ्गसंज्ञा भवति। यथासंख्यमनुदेशः समानाम् अनेकाल्शित्सर्वस्य चेत्याभ्यां परिभाषाभ्यां परिष्कृतेन टाङसिङसामिनात्स्याः इति सूत्रेण अदन्तात् अङ्गात्परस्य ङसः स्थाने स्य इति सर्वादेशे रामस्य इति रूपं सिद्ध्यति।

रामशब्दात् षष्ठीद्विवचनविवक्षायाम् ओस्प्रत्यये राम ओस् इति स्थिते-

[११.८] ओसि च॥ (७.३.१०४)

सूत्रार्थः - ओसि परे अतोऽङ्गस्यैकारः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयं विद्यते। ओसि इति सप्तम्येकवचनान्तं पदम्। तस्य च ओसि परे इत्यर्थः। चेति अव्ययपदम्। अतो दीर्घो यञि इत्यस्मात् सूत्रात् अतः इति षष्ठ्यन्तं पदम् अनुवर्तते। बहुवचने झल्येत् इत्यस्मात् सूत्रात् एत् इति प्रथमान्तं पदम् अनुवर्तते। अङ्गस्य इत्यधिक्रियते। अतः अङ्गस्य एत् ओसि इति पदयोजना। अङ्गस्य इति षष्ठ्यन्तं पदम्। अतः इति अङ्गविशेषणम्। तेन तदन्तविधिना अदन्तस्य अङ्गस्य इत्यर्थो लभ्यते। तेन अस्य सूत्रस्य अर्थो भवति- ओसि परे अदन्तस्य अङ्गस्य एकारः भवति इति। अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य अलः स्थाने भवति इति स्फुटम्।

उदाहरणम्- रामयोः।

सूत्रार्थसमन्वयः- रामशब्दात् षष्ठीद्विवचनविवक्षायाम् ओस्प्रत्यये राम ओस् इति स्थितिः भवति। सकारस्य हलन्त्यम् इत्यनेन इत्संज्ञा प्राप्ता। तस्याः न विभक्तौ तुस्माः इत्यनेन सूत्रेण निषेधे राम ओस् इति भवति। अत्र वृद्धिरेचि इत्यनेन आद् एचि परे वृद्धिरेकादेशः प्राप्नोति। वृद्धिं बाधित्वा अतो गुणे इत्यनेन अपदान्ताद् अतः गुणे परतः पररूपमेकादेशः प्राप्नोति। एकादेशमपि बाधित्वा ओसि च इत्यनेन सूत्रेण ओसि परे अदन्तस्य अङ्गस्य अन्त्यस्य अलः एकारादेशे रामे ओस् इति जातम्। ततः एचः एकारस्य अचि ओकारे परे एचोऽयवायावः इत्यनेन सूत्रेण अयादेशे रामयोस् इति स्थितिः। ततः पदसंज्ञायां सकारस्य रुत्वे विसर्गे च रामयोः इति रूपं सिद्ध्यति।

पाठगतप्रश्नाः-२

८. स्थानिवदादेशोऽनल्विधौ इति कीदृशं सूत्रम्।

९. स्थानिवदादेशोऽनल्विधौ इत्यत्र अनल्विधौ इत्यस्य कः अर्थः।

१०. रामाय इत्यत्र सुप्त्वातिदेशः कथम् ।

११. रामेभ्यः इत्यत्र एत्वं कथम्।

१२. बहुवचने झल्येत् इत्यस्य सूत्रार्थं लिखत।

१३. वाऽवसाने इत्यस्य अर्थं लिखत।

१४. ओसि च इत्यस्य सूत्रस्य अर्थं लिखत।

रामशब्दात् षष्ठीबहुवचनविवक्षायाम् आम्प्रत्यये राम आम् इति जाते-

[११.९] ह्रस्वनद्यापो नुट्॥ (७.१.५४)

सूत्रार्थः - ह्रस्वान्तात् नद्यन्ताद् आबन्तात् च अङ्गात्परस्य आमो नुडागमः भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। ह्रस्वनद्यापः नुट् इति सूत्रगतपदच्छेदः। ह्रस्वनद्यापः इति पञ्चम्येकवचनान्तं समस्तं पदम्। ह्रस्वश्च नदी च आप् च इति ह्रस्वनद्याप् इति समाहारयोगद्वन्द्वः, तस्मात् इति ह्रस्वनद्यापः। नुट् इति प्रथमैकवचनान्तं पदम्। आमि सर्वनाम्नः सुट् इत्यस्मात् सूत्रात् आमि इति सप्तम्यन्तं पदम् अनुवर्तते। अङ्गस्य इत्यधिक्रियते। अङ्गस्य इति पदं पञ्चम्यन्ततया विपरिणम्यते। परस्य इति अध्याह्रियते। ह्रस्वनद्यापः अङ्गात् परस्य आमि नुट् इति पदयोजना। ह्रस्वनद्यापः इत्यत्र नदी इत्यनेन यू स्त्र्याख्यौ नदी इत्यनेन सूत्रेण विहितानां नदीसंज्ञकानां ग्रहणं भवति। आप् इत्यनेन टाप्, डाप्, चाप् इत्येतेषां स्त्रीप्रत्ययानां ग्रहणं भवति। अङ्गात् इति पदं ह्रस्वनद्यापः इति पदस्य विशेषणम्। अतः तदन्तविधिना ह्रस्वान्ताद् नद्यन्ताद् आबन्ताद् अङ्गाद् इत्यर्थो लभ्यते। आमि इत्यत्र सप्तमीनिर्देशः, ह्रस्वनद्यापः इत्यत्र पञ्चमीनिर्देशः। तेन उभयनिदर्शे पञ्चमीनिदर्शो बलीयान् इति न्यायेन तस्मादित्युत्तरस्य इति परिभाषया आमि इति सप्तम्यन्तस्य षष्ठ्यन्ततया

विपरिणामः भवति। नुट् इत्यत्र टकारस्य हलन्त्यम् इत्यनेन इत्संज्ञा भवति। तेन अयं टित् इति ज्ञायते। अतः आद्यन्तौ टकितौ इति परिभाषया अयम् आद्यावयवः भवति इति परिष्कृतम्। अतः अस्य सूत्रस्य अर्थः भवति ह्रस्वान्तात् नद्यन्ताद् आबन्तात् च अङ्गात्परस्य आमो नुटागमः आद्यावयवः भवति इति। अर्थात् ह्रस्वान्तशब्देभ्यः नदीसंज्ञकशब्देभ्यः आबन्तशब्देभ्यः च परतः आमः नुडागमः भवति।

उदाहरणम्- रामशब्दात् षष्ठीबहुवचनविवक्षायाम् आम्प्रत्यये राम आम् इति जातम्। मकारस्य हलन्त्यम् इत्यनेन इत्संज्ञा प्राप्ता। तस्याः न विभक्तौ तुस्माः इत्यनेन निषेधः भवति। रामशब्दः ह्रस्वान्तः अस्ति। प्रत्ययः परमस्ति । तस्मात् अङ्गसंज्ञकः अपि अस्ति। ततः परं च आम् अस्ति। अतः 'आद्यन्तौ टकितौ' इति परिभाषया परिष्कृतेन 'ह्रस्वनद्यापो नुट्' इति सूत्रेण ह्रस्वान्तात् अदङ्गात् अङ्गात् परस्यामः नुटि आद्यावयवेऽनुबन्धलोपे राम नाम् इति स्थिते अग्रिमं सूत्रं प्रवर्तते।

[११.१०] नामि॥ (६.४.३)

सूत्रार्थः - नामि परे अजन्तस्य अङ्गस्य दीर्घः भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे नामि इति एकमेव सप्तम्यन्तं पदं विद्यते। ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यस्मात् सूत्रात् दीर्घः इति प्रथमान्तं पदम् अनुवर्तते। दीर्घश्रुत्या अचश्च इति परिभाषया अचः इति पदम् उपतिष्ठते। अङ्गस्य इति षष्ठ्यन्तम् अधिक्रियते। नामि अचः अङ्गस्य दीर्घः इति पदयोजना। नामि इत्यत्र परसप्तमी अस्ति। अतः तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषया नामि निर्दिष्टे पूर्वस्य इत्यर्थलाभः। अचः इति अङ्गविशेषणम्। तेन तदन्तविधिना अजन्तस्य अङ्गस्य इत्यर्थो लभ्यते। तेन अस्य सूत्रस्य अर्थः भवति- नामि परे अजन्तस्य अङ्गस्य दीर्घः भवति इति। अर्थात् नकारसहिते आमि प्रत्यये परे अजन्तस्य अङ्गस्य दीर्घो भवति।

उदाहरणम्- रामाणाम्।

सूत्रार्थसमन्वयः- रामशब्दात् षष्ठीबहुवचनविवक्षायाम् आम्प्रत्यये नुडागमे राम नाम् इति जातम्। ततः अचश्च अलोऽन्त्यस्य चेत्याभ्यां परिभाषाभ्यां परिष्कृतेन नामि इति सूत्रेण अजन्तस्य अङ्गस्य रामशब्दस्य अन्त्यस्य अलः अकारस्य दीर्घे रामानाम् इति भवति। तस्य सुबन्तत्वेन समानपदत्वात् रेफरूपात् निमित्तात् अटा पवर्गीयेण अटा च व्यवहितस्य नकारस्य अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णत्वे कृते रामाणाम् इति रूपं सिद्ध्यति।

सप्तम्येकवचनविवक्षायां ङिप्रत्यये राम ङि इति जातम्। ततः ङकारस्य लशक्वतद्धिते इत्यनेन इत्संज्ञायां तस्य लोपः इत्यनेन तस्य लोपे राम इ इति जातम्। अत्र आद्गुणः इत्यनेन गुणे एकादेशे वर्णसम्मलने रामे इति रूपं सिद्ध्यति।

रामशब्दस्य सप्तमीद्विवचनविवक्षयाम् ओस्प्रत्यये राम ओस् इति जातम्। ततः ओसि च इत्यनेन ओसि परे अदन्तस्य अङ्गस्य एकारादेशे रामे ओस् भवति। तत्र एचः एकारस्य अचि ओकारे परे एचोऽयवायावः इत्यनेन सूत्रेण अयादेशे रामयोस् इति स्थिते रुत्वे विसर्गे च रामयोः इति रूपं सिद्ध्यति।

रामशब्दस्य सप्तमीबहुवचनविवक्षयां सुप्प्रत्यये सुपः पकारस्य हलन्त्यम् इत्यनेन इत्संज्ञायां तस्य लोपः इत्यनेन लोपे राम सु इति जातम्। रामशब्दः अदन्तः अस्ति। सुप्रत्ययः झलादिः बहुवचनसंज्ञकः च विद्यते। अतः अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन बहुवचने झल्येत् इत्यनेन रामशब्दावयवस्य अन्त्यस्य अकारस्य एकारे रामेसु इति जाते-

[११.११] आदेशप्रत्यययोः॥ (८.३.५९)

सूत्रार्थः - इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशः प्रत्ययावयवश्च यः सकारः तस्य मूर्धन्यादेशः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। सूत्रमिदम् एकपदात्मकम्। आदेशप्रत्यययोः इति षष्ठीद्विवचनान्तं पदम्। आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इति इतरेतरयोगद्वन्द्वसमासः। सहेः साडः स इत्यस्मात् सूत्रात् स इति षष्ठ्यन्तं पदमनुवर्तते। अपदान्तस्य मूर्धन्यः इत्यस्मिन् अधिकारे सूत्रमिदं विद्यते। अपदान्तस्य इति षष्ठ्यन्तं पदम्। मूर्धन्यः इति प्रथमान्तं पदम्। अस्य च मूर्ध्नि भवः इत्यर्थः। इण्कोः इति पञ्चम्येकवचनान्तं पदम् अधिक्रियते। इण् च कुश्च इति इण्कु तस्मात् इण्कोः इति समाहारद्वन्द्वसमासः। इण्कोः आदेशप्रत्यययोः सः मूर्धन्यः इति पदयोजना। इण् इति प्रत्याहारः। अइउण् इति सूत्रमारभ्य लणः णकारपर्यन्तम्। कुः इत्यनेन कवर्गः गृह्यते। एवञ्च इण्कोः परस्य अपदान्तस्य आदेशस्य प्रत्ययस्य च यः सकारः तस्य मूर्धन्यादेशः इति अन्वयः। अत्र आदेशविषये अभेदात्मिका षष्ठी स्वीक्रियते, प्रत्ययविषये च अवयवात्मिका षष्ठी स्वीक्रियते। तेन अस्य सूत्रस्य अर्थो भवति- इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशः यः सकारः प्रत्ययावयवश्च यः सकारः तस्य मूर्धन्यादेशः भवति इति। अर्थात् इण्प्रत्याहारकवर्गाभ्यां परस्य सकाररूपः यः आदेशः प्रत्ययावयवात्मकश्च यः सकारः तस्य मूर्धन्यादेशः भवति। विवृताघोषस्य सकारस्य तादृश एव षकारः आदेशः भवति।

उदाहरणम्-रामेषु।

सूत्रार्थसमन्वयः:- रामशब्दात् सप्तमीबहुवचनविवक्षयां सुप्प्रत्यये अनुबन्धलोपे प्रक्रियाकार्ये रामे सु इति स्थितिः जायते। अत्र सुप्रत्ययस्य सकारः प्रत्ययावयः अस्ति। स च सकारः एकारात् परमस्ति। एकारश्च इण्प्रत्याहारे अन्तर्भवति। तस्मात् आदेशप्रत्यययोः इत्यनेन सूत्रेण प्रत्ययावयवस्य सकारस्य मूर्धन्यादेशे षकारे रामे षु इति भवति। ततः वर्णसम्मेलने रामेषु रूपं सिद्ध्यति।

रामशब्दवत् कृष्णमुकुन्दादयः अकारान्तपुँल्लिङ्गशब्दाः अपि विज्ञेयाः।

इदानीं ये शब्दाः सर्वादिगणपठिताः तेषु सर्वशब्दस्य रूपसाधनप्रक्रिया कथं भवति इति पर्यालोचनं कुर्मः। यद्यपि रामवत् सर्वशब्दोऽपि अकारान्तोऽस्ति तथापि बहुषु स्थलेषु सर्वशब्दः रामशब्दात् विशिष्यते। तस्मात् सर्वशब्दस्य रूपाणां साधनाय यानि विशेषसूत्राणि आवश्यकानि तानि अत्र विस्तरेण पर्यालोच्यन्ते। आदौ सर्वनामसंज्ञाविधायकं सूत्रम् -

[११.१२] सर्वादीनि सर्वनामानि॥ (१.१.२६)

सूत्रार्थः:- सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः।

सूत्रव्याख्या- इदं संज्ञासूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। सर्वादीनि इति प्रथमाबहुवचनान्तं पदम्। सर्वनामानि इत्यपि प्रथमाबहुवचनान्तं पदम्। सर्वादीनि इति नपुंसकवशात् शब्दस्वरूपाणि इति प्रथमाबहुवचनान्तं विशेष्यपदम् अध्याहार्यम्। अतः सर्वादीनि शब्दस्वरुपाणि सर्वनामानि इति पदयोजना। सर्वः (सर्वशब्दः) आदिः प्रथमावयवः (आद्यवयवः) येषां (शब्दस्वरूपाणां) तानि सर्वादीनि तद्गुणसंविज्ञानबहुव्रीहिसमासः। सर्वशब्दः स्वरूपपरः। तेन सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञकानि भवन्ति इति सूत्रार्थः लभ्यते।

विशेषव्याख्या- सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्वम्, अन्तर, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् इत्येते पञ्चत्रिंशत् शब्दाः सर्वादिगणे पठिताः। एतेषाम् एव सर्वनामसंज्ञा भवति।

विश्वशब्दः सर्वशब्दः समशब्दः सर्ववाचकः। समशब्दः तुल्यपर्यायः अपि अस्ति। परन्तु अत्र तुल्यपर्यायस्य समशब्दस्य ग्रहणं नास्ति। उभशब्दस्तु द्वित्वविशिष्टस्य वाचकः। अतः एव नित्यः द्विवचनान्तः। उभयशब्दस्तु नित्यबहुवचनान्तः भवति। डतरडतमौ प्रत्ययौ भवतः। प्रत्ययग्रहणे तदन्ताः ग्राह्याः इत्यनेन तदन्तविधिना डतरडतमप्रत्ययान्तौ एव स्वीकर्तव्यौ। तेन डतरडतमग्रहणेन अत्र कतरकतमादिशब्दानाम् अपि ग्रहणं भवति। त्व त्वद् द्वौ अपि अन्यपर्यायौ। नेमशब्दः अर्धवाचकः। एकशब्दः संख्यायां नित्यैकवचनान्तः।

सर्वनामसंज्ञा अन्वर्थसंज्ञा। अन्वर्थसंज्ञायाः महासंज्ञा इत्यर्थः। तेन सर्वशब्दः यदा सर्वार्थस्य वाचकः भवति तदैव सर्वनामसंज्ञा भवति परन्तु यदा कस्यापि नाम सर्वः भवति तदा तु सर्वशब्दस्य सर्वनामसंज्ञा न भवति।

उदाहरणम्- सर्वादिगणे आदौ पठितस्य सर्वार्थवाचकस्य सर्वशब्दस्य सर्वादीनि सर्वनामानि इति सूत्रेण सर्वनामसंज्ञा भवति। किञ्च अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञा भवति। प्रातिपदिकसंज्ञकस्य अस्य सर्वशब्दस्य प्रथमैकवचने द्विवचने च रामशब्दवत् सर्वः, सर्वौ इति रूपम्।

पाठगतप्रश्नाः-३

१५. रामाणाम् इत्यत्र नुडागमः कथम्।

१६. ह्रस्वानद्यापो नुट् इति सूत्रार्थं लिखत।

१७. रामाणाम् इत्यत्र दीर्घः कथम्।

१८. नामि इत्यस्य अर्थं लिखत।

१९. रामाणाम् इत्यत्र केन णत्वं विधीयते।

२०. सर्वादीनि सर्वनामानि इत्यत्र का संज्ञा विधीयते।

२१. सर्वादिगणे कति शब्दाः पठिताः।

२२. रामेषु इत्यत्र सकारस्य षकारः केन।

२३. कस्मात् परस्य सकारस्य मूर्धन्यः भवति।

सर्वशब्दात् बहुत्वविवक्षायां प्रथमाबहुवचने जस्-प्रत्यये, अनुबन्धलोपे सर्व जस् इति स्थिते-

[११.१३] जसः शी॥ (७.१.१७)

सूत्रार्थः - अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्।

सूत्रव्याख्या- इदं विधिसूत्रम्। सूत्रेऽस्मिन् द्वे पदे स्तः। जसः इति षष्ठ्येकवचनान्तं पदम्। शी इति प्रथमैकवचनान्तं पदम्। अतो भिस ऐस् इत्यस्मात् सूत्रात् अतः इति पञ्चम्यन्तं पदम् अनुवर्तते। सर्वनाम्नः स्मै इत्यस्मात् सूत्रात् सर्वनाम्नः इति पञ्चम्यन्तं पदम् अनुवर्तते। अतः सर्वनाम्नः जसः शी इति पदयोजना। सर्वनाम्नः इति पदम् अतः पदस्य विशेषणम्। तेन तदन्तविधिना अदन्तात् सर्वनाम्नः इत्यर्थो लभ्यते। जसः इत्यत्र षष्ठीनिर्देशात् षष्ठी स्थानेयोगा इत्यनया परिभाषया जसः स्थाने इत्यर्थः लभ्यते। जसः स्थाने विधीयमानः शी-इत्यादेशः अनेकाल् अस्ति। तस्मात् अनेकाल्शित्सर्वस्य इत्यनया परिभाषया सर्वस्य जसः स्थाने शी भवति इत्यर्थः लभ्यते। तेन अस्य सूत्रस्य अर्थः भवति- अदन्तात्सर्वनाम्नः परस्य जसः स्थाने शी इत्यादेशः भवति इति। अर्थात् अदन्तात् सर्वनाम्नः परस्य जसः सर्वस्य स्थाने शी इति आदेशः भवति।

उदाहरणम्- सर्वे।

सूत्रार्थसमन्वयः:- सर्वशब्दात् बहुत्वविवक्षायां प्रथमाबहुवचने जस्-प्रत्यये, अनुबन्धलोपे सर्व अस् इति स्थितिः। अत्र सर्वशब्दः अदन्तः अस्ति। सर्वादिगणे पठितः अस्ति। तस्मात् सर्वनामसंज्ञकः वर्तते। ततः परं जस्प्रत्ययः विद्यते। अतः जसः शी इति सूत्रेण जसः स्थाने शी इत्यादेशे सर्व शी इति भवति। ततः शकारस्य लशक्वतद्धिते इति सूत्रेणेत्संज्ञायां तस्य लोपः इति लोपे सर्व ई इति जायते। ततः स्थानेऽन्तरतमः इति परिभाषया आद् गुणः इति सूत्रेण अकारेकारयोः स्थाने स्थानतः आन्तर्यात् एकारे सर्वे इति रूपं सिद्धम्।

विशेषव्याख्या- ननु शी-इत्यादेशस्य शकारः इत्संज्ञकः अस्ति। तस्मात् शीत्त्वात् एव अनेकाल्शित्सर्वस्य इत्यनया परिभाषया सर्वादेशः सिद्धः। कथम् अनेकाल्त्वात् सर्वादेशः। अत्रेदम् उच्यते आदेशात्प्राक् शकारस्य इत्संज्ञा न भवति। लशक्वतद्धिते इत्यनेन प्रत्ययादेः शकारस्य इत्संज्ञा भवति। जसः स्थाने आदेशात्परमेव स्थानिवद्भावेन शी-इत्यस्य प्रत्ययत्वं सिद्ध्यति। ततः पूर्वं तु प्रत्ययत्वं नास्ति। प्रत्ययत्वाभावात् शकारस्य इत्संज्ञा अपि न भवति। तस्मात् अत्र शित्त्वात् सर्वादेशः न भवति, अनेकाल्त्वादेव सर्वादेशः भवति। नागेशमते तु शित्त्वादेव सर्वादेशो भवति। यतो हि तस्य मते इत्संज्ञायोग्यत्वमिति स्वीक्रियते न तु इत्संज्ञकत्वमिति।

सर्वम्- प्रातिपदिकसंज्ञकात् सर्वशब्दात् द्वितीयैकवचनविवक्षायाम् अम्प्रत्यये सर्व अम् इति स्थिते अमि पूर्वः इत्यनेन पूर्वपरयोः पूर्वरूपैकादेशे सर्वम् इति रूपम्।

सर्वौ- प्रातिपदिकसंज्ञकात् सर्वशब्दात् प्रथमाद्विवचनविवक्षायां औप्रत्यये सर्व औ इति स्थिते वृद्धिरेचि इत्यनेन पूर्वपरयोः वृद्धिरेकादेशे सर्वौ इति रूपम्। द्वितीयाद्विवचनविवक्षायाम् तु औट्प्रत्यये अनुबन्धलोपे सर्व औ इति स्थिते वृद्धिरेचि इत्यनेन पूर्वपरयोः वृद्धिरेकादेशे सर्वौ इति रूपम्।

सर्वान्- प्रातिपदिकसंज्ञकात् सर्वशब्दात् द्वितीयाबहुवचनविवक्षायां शस्प्रत्यये अनुबन्धलोपे सर्व अस् इति स्थिते प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वपरयोः सवर्णदीर्घैकादेशे सर्वास् इति स्थिते तस्माच्छसो नः पुंसि इत्यनेन सकारस्य नकारे सर्वान् इति रूपम्।

सर्वेण- प्रातिपदिकसंज्ञकात् सर्वशब्दात् तृतीयैकवचनविवकषायां टाप्रत्यये सर्व टा इति स्थिते टाङसिङसामिनात्स्याः इत्यनेन इनादेशे आद्गुणः इत्यनेन गुणे एकारे अट्कुप्वाङ्नुम्व्यवायेपि इत्यनेन णत्वे सर्वेण इति रूपम्।

सर्वाभ्याम्- प्रातिपदिकसंज्ञकात् सर्वशब्दात् तृतीयाद्वि-वचनविवकषायां चतुर्थीद्विवचनविवक्षायां पञ्चमीद्विवचनविवक्षायां वा भ्याम्प्रत्यये सर्व भ्याम् इति स्थिते सुपि च इत्यनेन अदन्ताङ्गस्य दीर्घे सर्वाभ्याम् इति रूपम्।

सर्वैः- प्रातिपदिकसंज्ञकात् सर्वशब्दात् तृतीयाद्वि-वचनविवकषायां भिस्प्रत्यये सर्व भिस् इति स्थिते अतः भिस ऐस् इत्यनेन भिसः ऐसादेशे वृद्धिरेचि इति वृद्धिरेकादेशे सर्वैस् इति जाते पदसंज्ञायां रूत्वे विसर्गे सर्वैः इति रूपम्।

एवञ्च सर्वशब्दात् चतुर्थ्येकवचनविवक्षायां ङेप्रत्यये सर्व ङे इति स्थिते ङेः स्थाने ङेर्यः इत्यनेन यादेशे प्राप्ते-

[११.१४] सर्वनाम्नः स्मै॥ (७.१.१४)

सूत्रार्थः - अतः सर्वनाम्नो ङे इत्यस्य स्मै स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। सूत्रेऽस्मिन् द्वे पदे स्तः। सर्वनाम्नः इति पञ्चम्येकवचनान्तं पदम्। स्मै इति प्रथमैकवचनान्तं पदम्। इत्यत्र विभक्तिलोपस्तु आर्षः। अतो भिस ऐस् इत्यस्मात् सूत्रात् अतः इति पञ्चम्यन्तं पदम् अनुवर्तते। ङेर्यः इत्यस्मात् सूत्रात् ङेः इति षष्ठ्यन्तं पदम् अनुवर्तते। अतः सर्वनाम्नः ङेः स्मै इति पदयोजना। अतः इति पदं सर्वनाम्नः इत्यस्य विशेषणं भवति। तेन तदन्तविधिना अदन्तात् सर्वनाम्नः इत्यर्थो लभ्यते। स्मै इत्यादेशः अनेकाल् अस्ति। तस्मात् ङे-इति सम्पूर्णस्य स्थाने स्मै इति आदेशः भवति। तेन अस्य सूत्रस्य अर्थः भवति- अदन्तात् सर्वनाम्नो ङे इत्यस्य स्मै इत्यादेशः भवति इति। अर्थात् अदन्तात् सर्वनामसंज्ञकशब्दात् ङेप्रत्ययस्य सर्वस्य स्थाने स्मै इति आदेशः भवति।

उदाहरणम्- सर्वस्मै।

सूत्रार्थसमन्वयः- सर्वार्थवाचकात् प्रातिपदकसंज्ञकात् सर्वशब्दात् चतुर्थ्येकचनविवक्षायां ङेप्रत्यये अनुबन्धलोपे सर्व ए इति स्थितिः भवति। अत्र सर्वशब्दः अदन्तः सर्वनामसंज्ञकः च वर्तते। अतः अनेकाल्शित्सर्वस्य इति परिभाषया परिष्कृतेन 'सर्वनाम्नः स्मै' इत्यनेन ङे-इत्यस्य स्थाने स्मै इत्यादेशे सर्वस्मै इति रूपं सिद्ध्यति।

[११.१५] ङसिङ्योः स्मात्स्मिनौ॥ (७.१.१५)

सूत्रार्थः - अतः सर्वनाम्नः ङसिङ्योः स्मात्स्मिनौ स्तः इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयं विद्यते। ङसिङ्योः इति षष्ठीद्विवचनान्तं पदम्। ङसिश्च ङिश्च इति ङसिङी तयोः ङसिङ्योः इति इतरेतरयोगद्वन्द्वसमासः। स्मात्स्मिनौ इति प्रथमाद्विवचनान्तं पदम्। स्मात् च स्मिन् च इति स्मात्स्मिनौ इति इतरेतरयोगद्वन्द्वसमासः। अतो भिस ऐस इत्यस्मात् सूत्रात् अतः इति पञ्चम्यन्तं पदम् अनुवर्तते। सर्वनाम्नः स्मै इत्यस्मात् सूत्रात् सर्वनाम्नः इति पञ्चम्यन्तं पदम् अनुवर्तते। अतः सर्वनाम्नः ङसिङ्योः स्मात्स्मिनौ इति पदयोजना। अतः इति पदं सर्वनाम्नः इत्यस्य विशेषणम्। तेन तदन्तविधिना अदन्तात् सर्वनाम्नः इत्यर्थो लभ्यते। अत्र स्थानिनौ अपि द्वौ आदेशौ अपि द्वौ तेन यथासंख्यविधिना ङसि इत्यस्य स्थाने स्मादादेशः, ङि-इत्यस्य स्थाने स्मिनादेशश्च भवतः। तेन अस्य सूत्रस्य अदन्तात् सर्वनाम्नः परयोः ङसिङ्योः स्मात्स्मिनौ आदेशौ भवतः इत्यर्थो जायते। आदेशयोः स्मात्स्मिनोः अनेकाल्त्वात् सर्वादेशत्वं सिद्ध्यति।

उदाहरणम्- सर्वस्मात्।

सूत्रार्थसमन्वयः- सर्वादिगणे पठितस्य सर्वार्थवाचकस्य सर्वशब्दस्य 'सर्वादीनि सर्वनामानि' इत्यनेन सूत्रेण सर्वनामसंज्ञा भवति। ततः पञ्चम्येकवचनविवक्षायां ङसिप्रत्यये अनुबन्धलोपे सर्व अस् इति स्थितिः भवति। 'यथासंख्यमनुदेशः समानाम्' इति परिभाषया परिष्कृतेन 'ङसिङ्योः स्मात्स्मिनौ' इत्यनेन ङसेः स्थाने स्मात् इत्यादेशे सर्वस्मात् इति स्थितिः। स्मादित्यादेशस्य स्थानिवद्भावात् विभक्तिसंज्ञा भवति। ततः स्मातः तकारस्य हलन्त्यम् इति सूत्रेण प्राप्तायाः इत्संज्ञायाः न विभक्तौ तुस्माः इत्यनेन निषेधः भवति। तेन सर्वस्मात् इति रूपं सिद्ध्यति।

[११.१६] आमि सर्वनाम्नः सुट्॥ (७.१.५२)

सूत्रार्थः - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः भवति।

सूत्रव्याख्या- सूत्रमिदं विधिसूत्रम्। अस्मिन् सूत्रे पदत्रयम् विराजते। आमि इति सप्तम्येकवचनान्तं पदम्। सर्वनाम्न इति पञ्चम्येकवचनान्तं सुबन्तम्। सुडिति प्रथमैकवचनान्तम्। आज्जसेरसुक् इत्यतः आदिति पञ्चम्यन्तं पदम् अनुवर्तते। अङ्गस्य इत्यधिक्रियते। तच्च पञ्चम्यन्ततया विपरिणम्यते। परस्य इति षष्ठ्यन्तम् अध्याह्रियते। आमि सर्वनाम्नः आत् अङ्गात् परस्य सुट् इति पदयोजना। आदिति अङ्गविशेषणम्। तेन येन विधिस्तदन्तस्य इति सूत्रप्रामाण्यात् तदन्तविधिना अवर्णान्तात् अङ्गात् इत्यर्थः प्राप्यते। सुटः टकारः हलन्त्यम् इत्यनेन इत्संज्ञकः। तेन अयम् आगमः इति ज्ञायते। आद्यन्तौ टकितौ इति परिभाषया च विहितस्य आद्यावयवः भवति इत्यपि स्फुटम्। आमि इत्यत्र सप्तमीनिर्देशः, सर्वनाम्नः इत्यत्र पञ्चमीनिर्देशः। तेन उभयनिदर्शे पञ्चमीनिदर्शो बलीयान् इति न्यायेन तस्मादित्युत्तरस्य इति परिभाषया आमि इति सप्तमी आमः इति षष्ठ्यन्तमापद्यते। अतः सूत्रस्य अस्य अर्थो भवति- अवर्णान्तादङ्गात्परस्य सर्वनाम्नो विहितस्य आमः सुडागमः इति।

उदाहरणम्- सर्वेषाम्।

सूत्रार्थसमन्वयः- सर्वनामसंज्ञकात् प्रातिपदिकसंज्ञकात् सर्वशब्दात् षष्ठीबहुवचनविवक्षायाम् आम्प्रत्यये सर्व आम् इति जातम्। आमः मकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा प्राप्ता। तस्याः न विभक्तौ तुस्माः इत्यनेन निषेधः भवति। ततः प्रकृतसूत्रेण आमः सुडागमे आद्यावयवे सुटि अनुबन्धलोपे सर्व साम् इति जाते, बहुवचने झल्येत् इत्यनेन एत्वे, आदेशप्रत्यययोः इत्यनेन इणः परस्य प्रत्ययावयवस्य सस्य षत्वे सर्वेषाम् इति रूपं सिद्ध्यति।

सर्वस्मिन्- सर्वशब्दस्य सप्तम्येकवचने ङिप्रत्यये सर्व ङि इति स्थितिः। ङिप्रत्ययस्य ङसिङ्योः स्मात्स्मिनौ इत्यनेन स्मिन् इत्यादेशे सर्वस्मिन् इति स्थितिः। स्मिन्-इत्यस्य स्थानिवद्भावात् विभक्तिसंज्ञा भवति। ततः स्मिनः नकारस्य हलन्त्यम् इति सूत्रेण प्राप्तायाः इत्संज्ञायाः न विभक्तौ तुस्माः इत्यनेन निषेधः भवति। तेन सर्वस्मिन् इति रूपं सिद्ध्यति।

सर्वयोः- प्रातिपदिकसंज्ञकात् सर्वशब्दात् षष्ठीद्विवचनविवक्षायाम् सप्तमीद्विवचनविवक्षायाम् ओस्प्रत्यये सर्व ओस् इति स्थिते ओसि च इत्यनेन सर्वशब्दावयवस्य अन्त्यस्य अकारस्य एकारे एचोऽयवायावः इत्यनेन अयादेशे सर्वयोस् इत्यस्य पदसंज्ञायां सस्य रुत्वे विसर्गे सर्वयोः इति रूपम्।

सर्वेषु- सर्वशब्दस्य सप्तमीबहुवचनविवक्षायां सुप्प्रत्यये सुपः पकारस्य हलन्त्यम् इत्यनेन इत्संज्ञायां तस्य लोपः इत्यनेन लोपे सर्व सु इति जातम्। सर्वशब्दः अदन्तः अस्ति। सुप्रत्ययः झलादिः बहुवचनसंज्ञकः च विद्यते। अतः अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन बहुवचने झल्येत् इत्यनेन सर्वशब्दावयवस्य अन्त्यस्य अकारस्य एकारे सर्वेसु इति जाते आदेशप्रत्यययोः इत्यनेन सकारस्य षकारे सर्वेषु इति रूपम्।

पाठगतप्रश्नाः-४

२४. जसः स्थाने कः आदेशः भवति।

२५. जसः शी इत्यस्य कः अर्थः।

२६. अदन्तात् सर्वनाम्नः ङे इत्यस्य कः आदेशः भवति।

२७. अदन्तात् सर्वनाम्नः ङसिङ्योः कौ आदेशौ भवतः।

२८. सर्वेषाम् इत्यत्र सुडागमः कथम्।

२९. आमि सर्वनाम्नः सुट् इति सूत्रस्यार्थः कः।

पाठसारः

अस्मिन् पाठे रामशब्दस्य तृतीयातः सप्तमीं यावत् रूपसाधनप्रक्रिया विस्तरेण निरूपिता। ततः येषां शब्दानां सर्वनामसंज्ञा भवन्ति ते शब्दाः वर्णिताः। सर्वनामशब्दाः पञ्चत्रिंशत् भवन्ति। तेषां नामत उल्लेखः अस्मिन् पाठे कृतः। सर्वादिगणे ये शब्दाः पठिताः तेषां सर्वनामसंज्ञा भवति। जशः शी

इत्यादिविशेषकार्यार्थं सर्वादिगणे पठितानां शब्दानां सर्वनामसंज्ञा कृता। अस्मिन् पाठे सर्वशब्दस्य यानि विशेषकार्याणि भवन्ति तानि ससूत्राणि वर्णितानि।

पाठान्तप्रश्नाः

१. टाङसिङसामिनात्स्याः इति सूत्रं व्याख्यात।

२. स्थानिवदादेशोऽनल्विधौ इति सूत्रं व्याख्यात।

३. स्थानिवदादेशोऽनल्विधौ इति सूत्रं व्याख्यात।

४. आदेशप्रत्यययोः इति सूत्रं व्याख्यात।

५. सर्वादीनि सर्वनामानि इति सूत्रं व्याख्यात।

६. आमि सर्वनाम्नः सुट् इति सूत्रं व्याख्यात।

७. ससूत्रं रूपाणि साधयत – रामेण रामाय रामाभ्याम् रामेभ्यः रामात् रामस्य रामयोः रामाणाम् रामे रामेषु सर्वे सर्वस्मै सर्वस्मात् सर्वेषाम् सर्वस्मिन्।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. टाङसिङसामिनात्स्याः।

२. अट्कुप्वाङ्नुम्व्यवायेपि इति सूत्रेण।

३. अकारान्तात् अङ्गात् टादीनां क्रमादिनादयः आदेशाः स्युः।

४. सुपि च।

५. यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्याद्।

६. अतो भिस ऐस्।

७. यादेशः।

उत्तराणि-२

८. अतिदेशसूत्रम्।

९. स्थान्यलाश्रयविधौ न कर्तव्ये।

१०. स्थानिवदादेशोऽनल्विधौ इति सूत्रेण।

११. बहुवचने झल्येत्।

१२. झलादौ बहुवचने सुपि परे अतोऽङ्गस्यैकारःस्याद्।

१३. अवसाने झलां चरो वा स्युरिति।

१४. ओसि परे अतोऽङ्गस्यैकारः स्याद्।

उत्तराणि-३

१५. ह्रस्वानद्यापो नुट्।

१६. ह्रस्वान्तान्नद्यन्तादाबन्ताच्च अङ्गात्परस्य आमो नुटागमः स्यात्।

१७. नामि।

१८. नामि परे अजन्तस्य अङ्गस्य दीर्घः स्याद्।

१९. आदेशप्रत्यययोः।

२०. सर्वनामसंज्ञा।

२१.

२२. आदेशप्रत्यययोः

२३. इण्कोः

उत्तराणि-४

२४. शी इत्यादेशः।

२५. अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात् इति।

२६. स्मै इत्यादेशः।

२७. स्मात्स्मिनौ इत्यादेशौ।

२८. आमि सर्वनाम्नः सुट्

२९. अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः इति।

।।इति एकादशः पाठः।।